# 2018

## M.A.

## Part I

## SANSKRIT

## PAPER—I

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

**[FIRST HALF—60 MARKS]**

1. अधोलिखितेषु मन्त्रेषु ऋषिछन्दोदेवता-निर्देशपूर्वकं मन्त्रद्वयस्य सायणदिशा संस्कृतभाषया व्याख्या कार्या– 2×8

(क) अग्ने यं यज्ञमध्वरं

विश्वतः परिभूरसि।

स इद्देवेषु गच्छति॥

*(Turn Over)*

(ख) वायवा याहि दर्शते-

मे सोमा अरंकृताः।

तेषां पाहि श्रुधी हवम्॥

(ग) पावका नः सरस्वती

वाजेभिर्वाजिनीवती।

यज्ञं वष्टु धियावसुः।

(घ) हये जाये मनसा तिष्ठ घोरे

वचांसि मिश्रा कृणवावहै नु।

न नौ मन्त्रा आनुदितास एते

मयस्करन्परतरे चनाहन् ॥

(ङ) यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।

दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥

**2.** कस्याप्येकस्य उत्तरं प्रदेयम् – 4×2

(a) अधोलिखितासु भाष्यपंक्तिषुं कयोश्चित् द्वयोः व्याख्या कार्या –

(क) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या।





(ख) अभिप्लवषडहस्य मध्यवर्त्रिषूकुथ्येषु

तृतीयसवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्'

इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

(ग) 'वायवायाही' त्यादयस्तृचाः प्रउगशस्त्रे विनियुक्ताः।

(घ) सारस्वते तृचे या प्रथमा सान्वारम्भणीयेष्टौ सरस्वत्याः पुरोऽनुवाक्या।

(b) निम्नलिखितमन्त्रेषु *द्वयोः* भावार्थः संस्कृतभाषया विलिख्यताम् —

(क) मित्रं हुवे पूतदक्षं

वरुणं च रिशादसंसम् ।

धियं घृताचीं साधन्ता॥

(ख) विश्वे देवासो अप्तुरः

सुतमा गन्त तुर्णयः।

उस्रा इव स्वसराणि॥

(ग) तस्माद्यज्ञात् सर्वहुत

ऋचः सामानि जज्ञिरे

छन्दांसि जज्ञिरे तस्माद-

यजुस्तस्मादजायत॥

(घ) नासदासीन्नो सदासीत्तदानीं

नासीद्रजो नो व्योमा परो यत्।

किमावरीवः कुह कस्य शर्म-

न्नम्भः किमासीद्गहनं गभीरम्॥

3. अग्निदेवतायाः वायुदेवतायाः वा चारित्रिकवैशिष्ट्यं सम्यगालोच्यताम्। 8

*अथवा*

अथर्ववेदे भूमिसूक्तस्य काव्यसौन्दर्यं यथायथं प्रतिपाद्यताम्।

4. अधोलिखितेषु पदेषु *द्वयोः* व्याकरणदिशा साधन-प्रक्रिया प्रदर्श्यताम् – 4×2

वक्षति, दिवेदिवे, तूतुजानः, सहस्रशीर्षा, कृणोतु।

*अथवा*

प्रथमप्रश्नान्तर्गतस्य कस्यचिदेकस्य मन्त्रस्य पदपाठं

प्रदर्श्य यथेच्छं *द्वयोः* पदयोः सूत्रोल्लेखपूर्वकं स्वराः साध्यन्ताम्।





5. पञ्चमहायज्ञानां नामानि विलिख्य पितृयज्ञस्वरूपं सम्यगालोच्यताम्। 10

*अथवा*

ऐतरेयब्राह्मणोक्तं शुनःशेपोपाख्यानं संक्षेपेण विलिख्य

अत्र 'चरैवेति' इत्यंशस्य का अन्तर्निहिता भावना?

इति विशदीक्रियताम्।

6. कठोपनिषदि वर्णितं नचिकेतसः तृतीयवरस्वरूपं प्रतिपाद्यताम्। 10

*अथवा*

बृहदारण्यकोपनिषदि वर्णितायाः याज्ञवल्क्योपदिष्टायाः

शिक्षायाः वैशिष्ट्यं प्रस्तूयताम्।

**[SECOND HALF—40 MARKS]**

1. (a) अधोलिखितेषु निरुक्तवचनेषु द्वयोर्व्याख्या यास्कदिशा विधेया। 2×8

(क) पूर्वापरीभूतं भावमाख्यानेनाचष्टे व्रजति पचतीत्युपक्रम-प्रभृत्यपवर्गपर्यन्तम्॥

(ख) इन्द्रियनित्यं वचनमौदुम्बरायणः॥

(ग) व्याप्तिमत्त्वात्तु शब्दस्य॥

(घ) षड्भावविकारा भवन्तीति वार्ष्यायणिः॥

*अथवा*

(b) नामाख्यातयोर्लक्षणमुदाहरणादिकं यथा आचार्ययास्केन निरुक्तग्रन्थे प्रतिपादितं तत्सर्वं वैशधेन विवृणुत।

2. अधोनिर्दिष्टेषु पदेषु यथेच्छं *त्रयाणां* निर्वचनं यास्कदिशा प्रस्तूयताम्। 3×3

आचार्यः, समुद्रः मेघः, नदी, वृत्रः।

3. मन्त्राणां विवक्षितार्थत्वमस्ति नवेति सायणदिशा सयुक्तिकं विचार्यताम्। 15

*अथवा*

विधिरूपस्य ब्राह्मणस्य प्रामाण्यमाश्रित्य सायणमतं सयुक्तिकं प्रतिपाद्यताम्।

———